श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीद्वादशनामस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री लक्ष्मीद्वादशनामस्तोत्रम् ॥

श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा।
तृतीयं कमला प्रोक्ता चतुर्थं लोकसुन्दरी ॥ 1 ॥

पञ्चमं विष्णुपत्नी च षष्ठं स्यात् वैष्णवी तथा।
सप्तमं तु वरारोहा अष्टमं हरिवल्लभा ॥ 2 ॥

नवमं शार्ङ्गिणी प्रोक्ता दशमं देवदेविका।
एकादशं तु लक्ष्मीः स्यात् द्वादशं श्रीहरिप्रिया ॥ 3 ॥

द्वादशैतानि नामानि त्रिसन्ध्यं यः पठेन्नरः।
आयुरारोग्यमैश्वर्यं तस्य पुण्यफलप्रदम् ॥ 4 ॥

द्विमासं सर्वकार्याणि षण्मासाद्राज्यमेव च।
संवत्सरं तु पूजायाः श्रीलक्ष्म्याः पूज्य एव च ॥ 5 ॥

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूत समस्त देववनितां लोकैक दीपांकुराम्।
श्रीमन्मन्दकटाक्ष लब्ध विभव ब्रह्मेन्द्र गंगाधरां
त्वां त्रैलोक्य कुटुंबिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥ 6 ॥

॥ श्री लक्ष्मीद्वादशनामस्तोत्रं समाप्तम् ॥